1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तु: १

श्रीगणेशाय नमः ॥ अथ तुलादानविधिः चंद्रतारानुकूले शुभदिने यजमान
हस्तेन यष्टीयव होड्डवं पञ्चहस्तं स्तंभं चतुर्हस्तमात्रां तुलामानीय तत्र यित्वा
हरिद्रया विलिप्य ॥ यजमानहस्तेन हस्तमात्रं स्तंभं जातं कृत्वा ॥ जाते हरिद्र
रञ्जीफलद्रव्यादिनी दिव्य स्तंभं आरोपयेत ॥ इद्विलोतरां यां तुलां डोरि
केण बध्वा वेशपात्रद्वयं उभयतः बध्वा ॥ यथा हस्तमात्रे उच्चं भवति तथा कर्त
व्यं ॥ अथ कृतनित्यक्रियो यजमानः प्रथमं गणेशपूजनं कुर्यात् ॥ शुभा
सने उपवीश्याचम्य ॥ अर्घं संस्थाप्य ॥ पूजासंकल्पः ॥ अद्येत्यादि ॥ अमु
कशर्माहं ध्वताद्यन्न तुलादानकर्मणि निर्विघ्नप्राप्तये गणेशस्य पूजनं क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तु
२ पूजासंकल्पः। अद्येह अमुकराशिरमुकशर्माहं घृतान्नतुलादानकर्मणि सु
वर्णप्रतिमायां गोविन्ददेवस्य पूजनं करिष्ये॥ एतंतेति प्रतिष्ठा॥ ॐ भूर्भुवः
स्वः सुवर्णप्रतिमायां गोविन्ददेवस्य प्रतिष्ठितो वरदो भव॥ अथ ध्यानं॥ प्र
धृतचक्रं गदाम्बुजे वामके करयोः क्रमात् उर्द्धं शंखमधः पद्मं गोविन्दे क
२ मलाङ्के इति ध्यात्वा॥ ॐ गोविन्दाय नमः इति नाममंत्रेण आवाहना
सनपाद्यादिनीराजनांतं संपूज्य॥ पुष्पांजलिः नमो ब्रह्मण्यदेवाय इति
पठेत्॥ ततः एतंतेति ॐ भूर्भुवः स्वः तुले सुप्रतिष्ठा वरदा भव इति तुलां प्र
तिष्ठाप्य ॐ तुलायै नमः इति मंत्रेण तुलां गंधादिभिः संपूज्य पीतवस्त्रे
ण तुलां स्तंभं चाच्छाद्य॥ स्वर्णशृङ्गं माल्याम्बरधरो २ होतकुसुमांजलि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्ये इति संकल्पः गणेशं संपूज्य॥ प्रथमतुलारोहणे मातृपूजां नांदी
श्राद्धं पुण्याहवाचनानि कृत्वा प्रधानसंकल्पः अद्येत्यादि अमुक
गोत्रोहं अमुकशर्माहं मम मद्दुष्टग्रहदशाजनिततद्दोषारिष्टनिवृत्तिपूर्वक
दीर्घायुःप्राप्तिकामः श्रीपरमेश्वरप्रीतये अद्यतनतुलारोहणपूर्व
कं तुलादानं करिष्ये तत्प्रतिज्ञार्थं आचार्यस्य पूजनं वरणं च क
रिष्ये तथा गौर्यादिषोडशमातृणां कलशनवग्रहाणां च पूजनं करि
ष्ये इति संकल्पः॥ आचार्यं संपूज्य वरणं कृत्वा कलशस्थापनं कृत्वा॥
तत्र नवग्रहाणामावाह्य संपूज्य॥ स्वर्णनिर्मितां गोविन्दप्रतिमां अ
ग्न्युत्तारणपूर्वकं पंचामृतेन संस्नाप्य॥ स्थाप्य स्थापितानि धाय॥ अग्निं संस्थाप्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तु. २

दधिकं घृताद्यन्नं स द्रव्यं स्थापयेत्॥ पुष्टिकामो भूमिसंस्थं कारयेत्॥ तुला
यां जो दोहमात्रं स्थित्वा मंत्रं पठेत्॥ नमस्ते सर्वभूतानां साक्षिभूते सनात
नी पितामहेन देवि त्वं निर्मिता परमेष्ठिना त्वया धृतं जगत्सर्वं सह स्थावर
जंगमं सर्वभूतात्मभूतेशे नमस्ते विश्वधारिणी इति पठित्वा॥ अवतीर्य
ध्यात्वा लोकनं कृत्वा प्रतिमा संकल्पः॥ अद्येह अमुकगोत्रोहं मम अमुक
3 ग्रहदशा जनिते तद्दुष्टारिष्ट निवृत्ति पूर्वक दीर्घायुरारोग्यप्राप्तये इमां सौ
वर्णीं सुपूजितां गोविन्द प्रतिमां आत्म तोलितां तृतीयांश तुरीयांशं वा
घृताद्यन्नं आचार्याय दास्ये॥ तथा अवशिष्टं घृताद्यन्नं अन्येभ्यो ब्राह्म
णेभ्यो दीनानाथेभ्यो विभज्य दास्ये॥ तथा एतत्तुलारोहणकर्मणः सद्गुण्या
र्थं इमां भूयसीं दक्षिणां भोजनं च ब्राह्मणेभ्यो विभज्य दास्ये तत्सन्नमः इति संकल्पः ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्त्रिवारं तुलां प्रददाति ॥ कृत्य मंत्रं पठेत् ॐ नमस्ते सर्व देवानां
शक्तिस्त्वं सत्यमाश्रिता साक्षिभूता जगद्धात्री निर्मिता विश्वयोनि
ना एकतः सर्व सत्यानि तथान्ऽनृत शतानि च धर्माधर्म कृतां मध्ये स्था
पितासि जगद्धिते त्वं तुले सर्व भूतानां प्रमाणमिह कीर्तिता मां तोलयं
ती संकष्टाद्दुद्धर स्व नमोऽस्तुते ॥ नमो नमस्ते गोविन्द तुला पुरुषसंज्ञक
त्वं हरे तारयस्वास्मान् अस्मात् संकष्टसागरात् इति पठित्वा ॥ प्रंजलिस्था
नि पुष्पाणि तुलायामवकीर्य पुनः प्रदक्षिणं कृत्वा ॥ सर्वस्त्रो [illegible] ज्यही
तेष्ठ देव उतरभाजे वंशपात्रे उपवीशेत् ॥ गोमयादिना तुलास्तंभेऽ
वलंबितापाः गोविन्द प्रतिमा भाः मुखं वपश्येत् ॥ दक्षिणभाजे वंशपात्रे सभा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वंशपात्रे नाम तुला के पट्टे का है

तु.
४

घृतस्य शुद्धिं न पश्यति । आज्येन स्वमुखं दृष्ट्वा सर्वपापैः प्रमुच्यते इत्यभिमं
त्रा: संकल्पः ॥ अद्येह अमुकगोत्रोहं अमुकशर्माहं सर्वारिष्टनिवारणा
र्थं आज्यावेक्षणे विनियोगः ॥ तेजोसीति परमेष्ठि ऋषिस्त्रिष्टुप छन्दः
आज्यावेक्षणे विनियोगः ॥ ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रि
4 यं देवानामनाधृष्टं देवयजनमसि । आज्यं तेजः समुद्दिष्टं आज्यं पापह
रं परं आज्येन देवास्तृप्यंति आज्ये लोकाः प्रतिष्ठिताः भौमांतरिक्षं दिव्यं
वा यन्मे कल्मषमागतं तत्सर्वं आज्यसंपर्कात् प्रणाशमुपगच्छतु ॥ ॐ ध्रु
वोसि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् घृतेन द्यावा
पृथिवी पूर्येथामिंद्रस्य सदिरसि विश्वजनस्य छायाध्यत घाया दर्शनं पाप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

४

॰आचार्यादिभ्यो ब्राह्मणेभ्यो यथांशेन॰ अन्नं दक्षिणां दत्वा॰ अभिषेकतिलक
रत्वा घृतछायापात्रं पात्रादिकं त्वा नवग्रहान् विसृज्य॥ सर्वेभ्यः प्रण
म्य यथासुखं विहरेत् इति घृतान्नतुलादानविधिः समाप्तोऽयम्॥॥
॰अथ घृतछायाविधिः॥ घृतछायापात्रे सद्रव्यं कुशैरालोडनं अक्षतपु
ष्पैः [illegible]तुलास्थाने संपूज्य कुशैः दर्वीभिः मंत्रालोडनं॥ ॰आज्यं परमयज्ञायामा
ज्यं तेजोमयोनिधिः॰ आज्यं गृ देवदेवानां प्रियमाज्यैः स्थितं हविः तदाज्य
विक्षणे भक्त्या कृते मंगलमाप्नुयात् दुःस्वप्नं दुर्निमित्तं च विघ्नौघो नश्यते
ध्रुवं तेजः प्रज्ञा च सौख्यं च बलं चापि प्रवर्द्धते पुरंपसक्षाङ्गः राज्यं च भवेद
न्यदाभीप्सितं ज्ञात्वाज्ञानतो वापि मनोवाक्कायकर्मभिः कृतं यत्पातकं तन्मे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तुं १अथसामग्री कलश १ नालियर २ सुपारी ५ डोरि केना ले ४ पंचरंग ५
५ रेताकुशा फूल फूल १ अक्षत तिलयव ॥ १ मूर्ति सुवर्ण की विष्णु की ॥ १ कटोरी
धावा पात्र की ॥ ५ से [illegible] रा कौपीत वस्त्र २ ॥ गजं ॥ पुष्प धूप अष्ट० दीपक १
S १ तुल० और घृता घृतं नैवेद्य ॥ अमृत आवरण कलशा ७ रखो संवत १६५२
१ मूर्ति सूर्य्य की १ मूर्ति यम की १ गोविन्द भगवान की इस प्रकार छापे की पधुती
मै तिखी है ॥ ___ जो सामर्थ हो तो २८ मूर्ति सुवर्ण की करणी इस प्रकार
१ गोविन्द भगवान की ॥ १ सूर्य्य की ॥ १ यमकी ॥ २३ मूर्ति देउ देवता की
है २३ देवताधिष्ठाता देवता लो की है ताम्र के ८ ज नकरणो लिखे है ॥ ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नाशनं इत्येव लोक्य आज्यस्य शं कृत्वा संकल्पः॥ अद्येह अमुकगोत्रोत्पन्नो
हं अमुकनामशर्माहं सर्वारिष्टनिवारणार्थं अपत्यमृत्युविनाशनार्थं
मृत्युंजयदेवप्रीतये इदमावलोकितमाज्यं सद्रव्यं कांस्यपात्रस्थितं ता
म्रपात्रस्थितं वा ब्राह्मणाय [illegible] अस्मभ्यमहं ब्राह्मणं जं धारादिभिः संप्रदः
6 दद्यात् दानवाक्यं पठेत् कामधेनोः समुद्भूतं देवानाममृतं महत् हविः आयुर्वृद्धि
करं दातुराज्यं पातु सदैव ते इति पठित्वा॥ ब्राह्मण अवश्य स्त्री स्पृष्टा द दातु
ब्राह्मणः मंत्रं पठेत् ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारु
कमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ मंत्रार्थाः सफलाः सन्तु इति पठित्वा
यजमानाय दद्यात् इति छत्रदानपात्रविधिः समाप्तः श्रीरस्तु शुभमस्तु॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham